# १८. उपकारस्य स्मरणम् ।



**रामायणम् आदिकाव्यम् । रामायणस्य रचयिता वाल्मीकिः । श्रीरामस्य चरितम् अस्य ग्रन्थस्य विषयः । एषः प्रसङ्गः रामायणात् ।**

मारुतिः सीतायाः अन्वेषणार्थं लङ्कां प्रति उड्डयते । मार्गे महासागरः अस्ति । तस्य तले अवर्तत मैनाकः नाम पर्वतः । यदा मैनाकः गगने मारुतिं पश्यति तदा सः उद्गच्छति । समुद्रात् बहिः आयाति । मारुतिना क्रमणीयः मार्गः दीर्घः । मध्ये विश्रामार्थं स्थानमपि नास्ति इति मैनाकः जानाति । सः तस्य साहाय्यं कर्तुम् इच्छति । अतः मैनाकः मारुतिं प्रार्थयते, ''महाकपे! अलं परिश्रमेण, कृपया मम कूटे विश्रामं करोतु ।''

किमर्थं मैनाकः मारुतेः साहाय्यार्थम् उद्युक्तः? अपि सः मारुतेः आशीर्वचनम् इच्छति? न खलु । एतत् तु उपकारस्य स्मरणम् । मारुतेः तातः पवनदेवः मैनाकस्य साहाय्यम् अकरोत् पुरा । तदा सर्वे पर्वताः सपक्षाः । ते आकाशे स्वेच्छया विहरन्ति स्म, सहसा भूमौ निपतन्ति स्म । तेन त्रस्ताः ऋषयः इन्द्रम् उपागच्छन् । इन्द्रः पर्वतेभ्यः अकुप्यत् । सः वज्रेण पर्वतानां पक्षान् छेत्तुं प्रारभत । यदा इन्द्रः मैनाकं प्रति अगच्छत् तदैव पवनदेवः वेगेन तं समुद्रतलम् अनयत् । एवं पवनदेवः मैनाकं वज्रप्रहारात् अरक्षत् । मैनाकः पवनदेवस्य एतम् उपकारं स्मरति स्म । सः अचिन्तयत्, ''कृते च प्रतिकर्तव्यम् एष धर्मः सनातनः'' । अतः मैनाकः पवनपुत्रस्य मारुतेः साहाय्यम् अकरोत् । मैनाकस्य आतिथ्येन मारुतिः प्रीतः । तथापि विश्रामम् अकृत्वा सः कार्यसिद्ध्यर्थम् अग्रे सरति ।

## भाषाभ्यासः

१. एकवाक्येन उत्तरं लिखत ।

१) मारुतिः कस्याः अन्वेषणार्थं उड्डयते?
२) पर्वतस्य नाम किम्?
३) पुरा सर्वे पर्वताः कीदृशाः?
४) पर्वतैः के त्रस्ताः?
५) मैनाकं समुद्रतलं कः नयति?

२. प्रश्ननिर्माणं कुरुत ।

१) पवनदेवः मैनाकं <u>वज्रप्रहारात्</u> रक्षति ।
२) <u>ऋषयः</u> इन्द्रम् उपागच्छन् ।
३) इन्द्रः <u>पर्वतेभ्यः</u> अकुप्यत् ।
४) मैनाकः <u>समुद्रात्</u> बहिः आयाति ।

३. पृथक् कुरुत ।

| नाम | सर्वनाम | विशेषणम् | क्रियापदम् |
|---|---|---|---|
| | | | |

(मारुति:, तम्, ऋषय:, दीर्घ:, प्रीत:, चिन्तयति, उद्गच्छति, स:)

४. समूहेतरपदं चिनुत ।

१) मारुति:, पवनपुत्र:, हनुमान्, पावक: ।

२) सुरपति:, शक्र:, वज्रम्, इन्द्र: ।

३) मैनाक:, नग:, गिरि:, अचल: ।

I9G4VQ

५. विरुद्धार्थकशब्दान् लिखत ।

१) बहि: ×    २) उद्युक्त: ×    ३) स्मरणम् ×

६. पाठे 'मारुति' शब्दस्य स्थाने 'पवनसुत' अपि च 'पर्वत' इत्यस्य स्थाने 'अद्रि' इति शब्दं प्रयुज्य पाठं पुनर्लिखत ।

७. माध्यमभाषया लिखत ।

१. 'उपकारस्य स्मरणं' मैनाकेन कथं कृतम्?

२. मारुते: उड्डाणकथां श्रुत्वा कस्य आधुनिककथापात्रस्य स्मरणं भवति?

३. रामायणे येषाम् उल्लेख: तेषाम् अन्य-पशु-पक्षिणां विषयम् अनुसृत्य सन्दर्भान् लिखत ।

४. यदि पर्वता: अधुना अपि पक्षयुक्ता: स्यु: तर्हि किं भविष्यति?

## लेखनकौशलम् ।
## संवादलेखनम् ।



**उपकारस्य स्मरणम् इति गद्यपाठं मञ्जूषाया: आधारेण संवादरूपेण लिखत ।**

मैनाक:- क: एष: आकाशे उड्डयते ? एष: तु मारुति:, पवनपुत्र: ।
नम: ते ________।

मारुति:- नम: ________ ।

मैनाक:- अयं समुद्रमार्ग: ________ । मार्गमध्ये ________ नास्ति ।
अत: क्षणं यावत् मम ________ विश्रामं करोतु ।

मारुति:- आवयो: परिचय: अपि नास्ति । तथापि त्वं किमर्थं मम ________ करोषि?

मैनाक:- तव पिता ________ । तस्य उपकारस्मरणं करोमि । पुरा ________ सपक्षा: आसन् । ________ क्रोधेन पर्वतानां ________ छेत्तुम् आरभत । तदा ________ मम साहाय्यम् अकरोत् । त्वं तस्य ________ अत: अहं तव साहाय्यं कर्तुम् इच्छामि ।

मारुति:- अस्तु । अहं प्रसन्न: । किन्तु स्थातुं न शक्नोमि । रामकार्यार्थम् अविलम्बं गच्छामि ।

**मञ्जूषा** - (पर्वता:, पवनपुत्राय, दीर्घ:, मैनाकाय, कूटे, विश्रामस्थानम्, पवनदेव:, साहाय्यम्, इन्द्र:, स:, पक्षान्, पुत्र:)